**अभिभावक** त्रि० अभि+भू—ण्वुल् । १ अभिभवकर्त्तरि २तिरस्कारके ३पराजेतरि ४जड़ीभावकारके च ।

**अभिभाविन्** त्रि० अभिभवति अभि+भू—णिनि स्त्रियां ङीप् । १तिरस्कारके २ पराजेतरि "सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना" रघुः । तृच् । अभिभवितापत्र ।

**अभिभावुक** त्रि० अभि+भू—उकञ् । १ तिरस्कारके २परा-जेतरि ३जड़ीभावकारके च ।

**अभिभाषण** न० आभिमुख्येन भाषणम् प्रा०स० । १ आभि-[मुख्येन कथने ।

**अभिभाषिन्** त्रि० आभिमुख्येन भाषते अभि+भाष—णिनि स्त्रियां ङीप् । आभिमुख्येन भाषिणि । "प्रसन्नमुखरागं तं स्मितपूर्व्वाभिभाषिणम्" रघुः ।

**अभिभू** त्रि० अभिभवति अभि+भू—क्विप् । १ अभिभावके २ तिरस्कारके "अभिभुवे अभिभङ्गाय वन्वते" ऋ०२,२१, २, "अभिभुवे अभिभवित्रे" भा० ।

**अभिभूत** त्रि० अभि+भू—क्त । १ किं कर्त्तव्यमिति ज्ञानशून्ये, २पराभूते, ३व्याकुले च । "सज्वरेणाभिभूत" इति ज्यो० ।

**अभिभूति** स्त्री अभि+भू—क्तिन् । १ पराभवे २अवज्ञायाञ्च अभिभवति कर्त्तरि क्तिच् । ३अभिभावके त्रि० । "गायत्र्यै छन्दसे अभिभूत्यै स्वाहा" कात्या०२५,२ । "यस्य पूर्वो द्यौर्निश्चलमभिभूति पुष्यात्" ऋ० ४,२१,१ । अभिभूति अभिभावुकं बलम्" भा० । अतः संदृश्याभिभूत आभर" ऋ०१,५३,३ । "अभिभूते, शत्रूणामभिभवितः" भा० ।

**अभिभूय** न० अभि+भू—भावे 'भुवो भावे' पा० क्यप् । अभितोभावे "अभिभूयाय त्वा राष्ट्रम्" अथ०१९,३७,२ । अभि+भू—ल्यप् । तिरस्कृत्येत्यर्थे अव्य० ।

**अभिभूवन्** त्रि० अभि+भू—ङ्वनिप् स्त्रियां ङीप् रश्च । अभिभावके "समजैषमिमा अहं सपत्नीरभिभूवरीः" ऋ० १०,१५९,६ ।

**अभिमत** त्रि० अभि+मन-कर्मणि क्त । १अभिमानविषयीभूते ममेदमिदमित्याकारमिथ्याज्ञानविषये २सम्मते ३आदृते ४अभीष्टे च "अभिमतफलशंसी चारु पुस्फोर बाहुः" भट्टिः । भावे क्त । ५ अभिमाने मिथ्याज्ञाने न० ।

**अभिमति** स्त्री अभि+मन—क्तिन् । १अभिमाने, मिथ्या-ज्ञाने २आदरे, ३सम्माने, ४अभिलाषे च ।

**अभिमनस्** त्रि० अभिमुखं मनो यस्य । कर्त्तव्यप्रवणमनस्के । भृशा० क्यङ् सलोपश्च अभिमनायते । "कान्तिं नाभि-मनायेत कोवा स्थाणुसमोऽपि ते" भट्टिः ।

**अभिमन्तव्य** त्रि० अभि+मन—कर्मणि तव्य । 'ज्ञातव्ये "न सा स्त्रीत्यभिमन्तव्या यस्यां भर्त्ता न रज्यति" पुरा० । २अभि-मानेन विषयीकर्त्तव्ये च ।

**अभिमन्तृ** त्रि० अभि+मन—तृच् स्त्रियां ङीप् । १अभिमानिनि "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्" मनुः । २सम्मान-कर्त्तरि च ।

**अभिमन्तोस्** अव्य० अभि+मन-तोसुन् । अभिमन्तुमभिमानेन विषयीकर्त्तुमित्यर्थे "एष वै रुद्रियोऽग्निः सहैनमीश्वरः सपुत्रं सपशुमभिमन्तोः" शत० ब्रा० ।

**अभिमन्त्र** न० अभि+मन्त्र—भावे अच् । १ "मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् । शेषिणं तन्मना भूत्वा स्यादेतदनु-मन्त्रणम् एतदेवाभिमन्त्रस्य लक्षणं वीक्षणाधिकम्" मीमां-सोक्ते मन्त्रपाठपूर्वकेक्षणादिसंस्कारभेदे । ल्युट् । अभिमन्त्र-णमप्यत्र न० "अभिमन्त्रणशेषो वा विशेषोपदेशात्" कात्या० ६,१,१९, "अभिमन्त्रणमुत्तरैः" कात्या०६,८,२१ ।

**अभिमन्त्र्य** अव्य० अभि+मन्त्र+ल्यप् । १ अभिमन्त्रणं कृत्येत्यर्थे

**अभि(धि)मन्थ** पु० अभि(धि)मथ्नाति नेत्रम् । "दृष्टैरेतैरभिष्य-न्दैर्नराणामक्रियावताम् । तावन्तस्त्वभि(धि)मन्थाः स्यु र्नयने तीव्रवेदने" इति माधवोक्ते १ नेत्ररोगभेदे भावे घञ् । २स्पर्शमन्थने । अत्रयी० । मन्थदण्डस्याभिमुख्येऽव्य० ।

**अभिमन्यु** पु० कृष्णस्वसृसुभद्रागर्भजाते अर्ज्जुनपुत्रे । स च युद्धे षड्भिः महारथैः परिवृत्य हतः । तत्कथा । "एत-त्कुरु महेष्वास ! राधेय ! यदि शक्यसे । अथैनं विमुखी-कृत्य पश्चात् प्रहरणं कुरु । सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः । विरथं विधनुष्कञ्च कुरुष्वैनं यदीच्छसि तदाचार्य्यवचः श्रुत्वा कर्णो वैकर्त्तनस्त्वरन् । अस्यतो लघु-हस्तस्य पृषत्कैर्धनुराच्छिनत् । तस्याश्वानवधीद्भोजो गौतमः पार्ष्णिसारथी । शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन् । त्वरमाणास्त्वराकाले विरथं षण्महारथाः । शरवर्षैरकरुणा बालमेकमवाकिरन् । स छिन्नधन्वा विरथः स्वं धर्ममनु-पालयन् । खड्गचर्मधरः श्रीमानुत्पपात विहायसा । मार्गैः स कौशिकाद्यैश्च लाघवेन बलेन च । आर्जुनिर्व्यच-रद्व्योम्नि भृशं वै पक्षिराडिव । मय्येव निपतत्येष सासि-रित्यूर्द्ध्वदृष्टयः । विव्यधुस्तं महेष्वासाः समरे छिद्रदर्शिनः । तस्य द्रोणोऽच्छिनन्मुष्टौ खड्गं मणिमयत्सरुम् । क्षुरप्रेण महातेजास्त्वरमाणः सपत्नजित् । राधेयो निशितैर्व्वाणै-र्व्यधमच्चर्म चोत्तमम् । व्यसिचर्मेषुपूर्णाङ्गः सोऽन्तरीक्षात् पुनः क्षितिम् । आस्थितश्चक्रमुद्यम्य द्रोणं क्रुद्धोऽभ्यधावत" इति 'विचेता न्यपतद्भूमौ सौभद्रः परवीरहा । एवं